एवंविधस्त्वं नृपसत्तमेन
प्रोक्तः कुरुष्वाघविनाशनाय ।
स्नानं हरेर्येन सुखं हि लप्से
लोके परे गच्छतेन वापि ॥
श्रुत्वा भवांस्तद्वचनञ्चकार
स्नानं त्वनेनापि जनार्द्दनस्य ।
दानं तथा गोः कृतवान् विभक्त्या
तस्मात् फलं विद्धि तवाप्रमेयम् ॥
एवं त्वया प्राप्यमशेषराज्यं
देवासुराणामहृतं विपक्षैः ।
संलप्स्यसे त्वं पुनरेव सर्व्वं
संपूजयन् भक्तियुतः सुरेशम् ॥”
इत्यग्निपुराणम् ॥

बलिराजयज्ञे वामनदेवभिक्षा । यथा,—
लोमहर्षण उवाच ।
“सपर्व्वतवनामुर्व्वीं दृष्ट्वा संक्षुभितां बलिः ।
पप्रच्छोशनसं शुक्रं प्रणिपत्य कृताञ्जलिः ॥
आचार्य्य क्षोभमायाति साब्धिभूम्यद्य ना मही ।
कस्माच्च नासुरान् भागान् प्रतिगृह्णन्ति वह्नयः ॥
इति पृष्टोऽथ बलिना काव्यो वेदविदांवरः ।
उवाच दैत्याधिपतिं चिरं ध्यात्वा महामतिः ॥
अवतीर्णो जगद्योनिः कश्यपस्य गृहे हरिः ।
वामनेनेह रूपेण परमात्मा सनातनः ॥
स नूनं यज्ञमायाति तव दानवपुङ्गव ! ।
तस्य पादप्रविक्षेपादियं प्रचलिता मही ॥
इयमस्य जगद्धातुर्माया ह्यस्य सात्वती ।
तत्सन्निधानादसुरा भागार्हा नासुरोत्तम ! ॥
भुञ्जते नासुरान् भागानपि तेन त्रयोऽग्नयः ।
शुक्रस्य वचनं श्रुत्वा हृष्टलोमाब्रवीद्बलिः ॥
धन्योऽहं कृतपुण्यश्च यतो जगत्पतिः स्वयम् ।
यज्ञमभ्यागतो ब्रह्मन् ! मत्तः कोऽन्योऽधिकः पुमान् ।
यं योगिनः सदोद्युक्ताः परमात्मानमव्ययम् ॥
द्रष्टुमिच्छन्ति देवोऽसौ ममाध्वरमुपैष्यति ।
यन्मयाचार्य्य ! कर्त्तव्यं तन्ममादेष्टुमर्हसि ॥
शुक्र उवाच ।
त्वयास्य दैत्याधिपते ! स्वल्पकेऽपि हि वस्तुनि ।
प्रतिज्ञा नैव वोढ़व्या वाच्यं साम तथा फलम् ॥
बलिरुवाच ।
ब्रह्मन् ! कथमहं ब्रूयामन्येनापि हि याचितः ।
नास्तीति किमु देवेशे संसाराघौघहारिणि ॥
लोमहर्षण उवाच ।
इत्थेवं वदतस्तस्य सम्प्राप्तः स जनार्द्दनः ।
सर्व्वदेवमयोऽचिन्त्यो मायावामनरूपधृक् ॥
तं दृष्ट्वा यज्ञवाटन्तु प्रविष्टमसुराः प्रभुम् ।
जग्मुः प्रभावात् क्षोभन्ते तेजसा तस्य निष्प्रभाः ॥
स चार्घ्यमादाय बलिः प्रोद्भूतपुलकस्तदा ।
पूजयामास गोविन्दं प्राह चेदं महासुरः ॥
बलिरुवाच ।
सुवर्णरत्नसंघातान् गजाश्वमहिषींस्तथा ।
स्त्रियो वस्त्राण्यलङ्कारान् गावः कुप्यञ्च पुष्कलम् ।
तद्ददामि हृषीकेश ममार्थौ सततं प्रियः ॥
इत्युक्तो दैत्यपतिना प्रीतिगर्भान्वितं वचः ।
प्राह सस्मितगम्भीरं भगवान् वामनाकृतिः ॥
ममाग्निशरणार्थाय देहि भूमिं पदत्रयाम् ।
सुवर्णग्रामरत्नादि तदर्थिभ्यः प्रदीयताम् ॥
एतच्छ्रुत्वा तु गदितं वामनस्य महात्मनः ।
ददौ तस्मै महाबाहुर्व्वामनाय पदत्रयम् ॥
पाणौ तु पतिते तोये वामनोऽभूदवामनः ।
सर्व्वदेवमयं रूपं दर्शयामास तत्क्षणात् ॥
जित्वा लोकत्रयं कृत्स्नं हत्वा चासुरपुङ्गवान् ।
पुरन्दराय त्रैलोक्यं ददौ विष्णुरुरुक्रमः ॥
सुतलं नाम पातालमधस्तादसुधातलम् ।
बलेर्द्दत्तं भगवता विष्णुना प्रभविष्णुना ॥
अथ दैत्येश्वरं प्राह विष्णुः सर्व्वेश्वरेश्वरः ।
यत्त्वया सलिलं दत्तं गृहीतं पाणिना मया ॥
कल्पप्रमाणं तस्मात्ते भविष्यत्यायुरुत्तमम् ।
वैवस्वते तथातीते बले ! मन्वन्तरे तथा ॥
सावर्णिके तु संप्राप्ते भवानिन्द्रो भविष्यति ।
इदानीं भुवनं दत्तं सर्व्वं शक्राय सर्व्वदा ॥
यदा सुरैश्च विप्रैश्च विरोधं त्वं करिष्यसि ।
बन्धिष्यति तदा पाशो वारुणो घोरदर्शनः ॥
बलिरुवाच ।
तत्रासतो मे पाताले भगवन् ! भवदाज्ञया ।
किं भविष्यत्युपादानमुपभोगोपयोगकम् ॥
श्रीभगवानुवाच ।
दानान्यविधिदत्तानि श्राद्धान्यश्रोत्रियाणि च ।
कृतान्यश्रद्धया यानि तानि दास्यन्ति ते फलम् ॥
अदक्षिणास्तथा यज्ञाः क्रियाश्चाविधिना कृताः ।
फलानि तव दास्यन्ति त्वधीतान्यव्रतानि च ॥
उदकेन विना पूजा विना दर्भेण या क्रिया ।
आज्येन च विना होमं फलदास्ते च ते बले ! ॥”
इति वामनपुराणे ३१ अध्यायः ॥ * ॥

ययातिवंशोद्भवसुतपोराजपुत्त्रः । यथा, विष्णुपुराणे । ४ । १८ । १ । “तितिक्षोरपि रुषद्रथः पुत्त्रोऽभूत् तस्यापि हेमः हेमस्य सुतपाः सुतपसश्च बलिः ॥” ( तथा च भागवते । ९ । २३ । ४ ।
“ततो होमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥”

मुनिविशेषः । यथा, महाभारते ।२।४।१०।
“अर्व्वावसुः सुमित्रश्च मैत्रेयः शुनको बलिः ॥”)

देवतोद्देशेन घातार्थोपकल्पितच्छागादिः। यथा, भविष्ये ।
“अजानां महिषाणाञ्च मेषाणाञ्च तथा वधात् ।
प्रीणयेद्विधिवत् दुर्गां मांसशोणिततर्पणैः ॥”
इति ।

पशुघातपूर्व्वकरक्तशीर्षयोर्ब्बलित्वम् । यथा,—
“स्थाने नियोजयेद्रक्तं शिरश्च सप्रदीपकम् ।
एवं दत्त्वा बलिं पूर्णं फलं प्राप्नोति साधकः ॥”
इति च दुर्गोत्सवतत्त्वम् ॥ * ॥

तच्छेदनार्थखड्गलक्षणमाह निबन्धतन्त्रे ।
“द्वादशाङ्गुलिको मुष्टा दीर्घो द्वात्रिंशदङ्गुलः ।
षडङ्गुलस्तु विस्तारः खड्गः कार्य्यो विधूपमः ॥
छेदयेत्तेन खड्गेन बलिं पूर्व्वमुखस्थितम् ।
अथवोत्तरवक्त्रञ्च स्वयं पूर्व्वाननस्ततः ॥” * ॥

सकृत्प्रहारेण बलिहननं तदभावे दोषश्चाह तत्रैव ।
“हन्यादेकप्रहारेण स्वयं वा चान्यतोऽपि वा ॥
यद्यप्येकेन घातेन बलिच्छेदो न जायते ।
तदर्व्वं चाप्य च महान् कर्त्तुर्हानिः पदे पदे ॥”
तन्त्रान्तरे ।
“एकखड्गप्रहारेण पशुर्यत्र न हन्यते ।
तदा विघ्नं विजानीयात् कर्त्तुर्व्वा छेत्तुरेव वा ॥”
निबन्धेऽपि ।
“यशोहानिर्ज्ञानहानिश्चार्थहानिस्ततः परम् ।
पुत्त्रहानिः सुते सत्त्वे तदसत्त्वे निजक्षयः ॥
अतः सद्यो महेशानि ! तन्मांसैर्होमयेत् सुधीः ।
होमादेव भवेच्छान्तिर्म्महत्येव न संशयः ॥” * ॥

प्रकारान्तरशान्तिमाह तत्रैव ।
“हन्यादेकप्रहारेण चान्यथा दोषमावहेत् ॥
तच्छान्तये जपेद्विद्यां तारादेव्याः सहस्रकम् ।
सहस्रं जुहुयान्मांसैर्द्द्याद्वा स्वर्णमाषकम् ॥
रुधिरं तत्तु पार्व्वत्यै न तु देयं कदाचन ।
बलिमन्यं समादाय भगवत्यै निवेदयेत् ॥” * ॥

निबन्धे ।
“यद्यप्येकेन घातेन महिषो नैव छिद्यते ।
तदर्व्वं महती हानिः कर्त्तुः पुत्त्रादिसम्पदाम् ॥
यस्मात् प्रजायते देवि ! ततः शान्तिं समाचरेत् ॥
आनीय महिषं तत्र घातयित्वा च तत्र वै ।
सास्थिभिर्लोमसहितैर्जुहुयाद्देवि ! यथार्थतः ॥
तच्छान्तये जपेद्विद्यां कालीं वा तारिणीं पराम् ।
अयुतं परमेशानि ! सहस्रं वापि साधकः ॥
सहस्रं विल्वपत्रैस्तु जुहुयात् संस्कृतेऽनले ।
ब्राह्मणं वा गुरुं वापि वरयेद्वसुभिः प्रिये ! ॥
पण्डितं वरयेद्वाथ बहुमानपुरःसरः ।
ततः स्वर्णं ब्राह्मणाय तस्मै दद्यात् शुभाप्तये ॥
एवञ्चेद्यजमानस्य शान्तिर्भवति नित्यशः ।
कुतस्तस्यैव शङ्का स्यात् वृद्धिस्तद्वत्सरावधि ॥ *
अथवा सर्व्वतोभद्रे नवकुम्भं निधापयेत् ।
सौवर्णं राजतं वापि ताम्रं वा तैजसन्तु वा ।
मार्त्तिक्यं वा चरेत्तत्र वित्तशाठ्यं न चाचरेत् ॥
तत्रैव कालिकां तारां तथा महिषमर्द्दिनीम् ।
यजेद्वा त्रिपुरां देवीं समस्तरश्मिमण्डिताम् ॥
कुलदीपैस्तथा वस्त्रैर्धनधान्यादिभिः प्रिये ! ।
पूजयेत् परमेशानीं वित्तशाठ्यविवर्ज्जितः ॥
बलिमन्यं छागलं वा तरुणञ्च सुलक्षणम् ।
घातयित्वा पुरोभागे चतुर्थां शोणितं न्यसेत् ॥
अपरं शोणितं तत्र राजते खर्परे न्यसेत् ।
अष्टाभिस्तर्पयेद्देवीं वक्ष्यमाणविधानतः ॥
एकेन वटुकादींश्च तथैकेनापि भैरवान् ।
अपरेणापि क्षेत्रेशानन्येन योगिनीगणम् ॥
तर्पयित्वा ततः पश्चाद्द्यास्तर्पणमाचरेत् ।
दक्षिणान्तं ततः कृत्वा पठेन्नामसहस्रकम् ॥
यथाशक्ति महेशानि ! भूयो देवीं घटे यजेत् ।
घटवक्त्रे वटाश्वत्थप्लक्षोडुम्बरशाखिकाम् ॥